॥ श्रीगणेशायनमः ॥ अद्येत्यादि० श्रीमहाकालीमहालक्ष्मीम
हासरस्वती देवता प्रीत्यर्थं चंडीसप्तशतीपाठाख्यं कर्म करिष्ये
तदंगत्वेनादौ कवचार्गलाकीलकपठनमादंतयोरष्टोत्तरशतसं
ख्यनवार्णजपपूर्वकं क्रमेण रात्रिसूक्तदेवीसूक्तपठनमंते रहस्य
त्रयपठनं च करिष्ये इति संकल्प्य प्रथमं नमो देव्यै महादेव्यै
शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मतां
इति मंत्रेण पंचोपचारैः पुस्तकपूजां कुर्यात् श्रीरस्तु॥ श्रीगणेश

दु॰ क॰ २ य नमः ॐ नमश्चण्डिकायै मार्कण्डेउवाच ॐ यद्गुह्यं परमं
लोके सर्वरक्षाकरं नृणाम् यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पिता
मह १ ब्रह्मोवाच अस्तिगुह्यतमं विप्र सर्वभूतोपकारकम् देव्या
स्तु कवचं पुण्यं तच्छृणुष्व महामुने २ प्रथमं शैलपुत्री च द्विती
यं ब्रह्मचारिणी तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ३ २
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च सप्तमं कालरात्रीति
महागौरीति चाष्टमम् ४ नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः

उक्तान्येतानिनामानि ब्रह्मणैवमहात्मना ५ अग्निनादह्यमा
नस्तु शत्रुमध्येगतोरणे विषमेदुर्गमेचैव भयार्ताश्शरणंगताः ६ न
तेषांजायतेकिञ्चिदशुभंरणसंकटे नापदंतस्यपश्यामिशोकदुः
खभयंनहि ७ यैस्तुभक्त्यास्मृतानूनं तेषांवृद्धिःप्रजायते येत्वांस्म
रंति देवेशि रक्षसेतान्नसंशयः ८ प्रेतसंस्थातुचामुण्डावाराहीम
हिषासना ऐन्द्रीगजसमारूढावैष्णवीगरुडासना ९ माहेश्वरीवृषा
रूढाकौमारीशिखिवाहना लक्ष्मीःपद्मासनादेवीपद्महस्ताहरि

श्रिया १० श्वेतरूपधरा देवी ईश्वरी वृषवाहना ब्राह्मी हंससमारू-
ढा सर्वाभरणभूषिता ११ इत्येता मातरः सर्वाः सर्वयोगसमन्वि-
ताः नानाभरण शोभाढ्या नानारत्नोपशोभिताः १२ दृश्यन्ते र-
थमारूढा देव्यः क्रोधसमाकुलाः शंखं चक्रं गदां शक्तिं हलं
च मुसलायुधम् खेटकं तोमरं चैव परशुं पाशमेव च १३ कुन्ता-
युधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् दैत्यानां देहनाशाय भ-
क्तानामभयाय च १४ धारयन्त्यायुधानीत्थं देवानां च हिताय वै

नमस्तेस्तु महारौद्रे महाघोरपराक्रमे १५ महाबले महोत्साहेम
हाभयविनाशिनि त्राहिमां देवि दुष्प्रेक्ष्ये शत्रूणाम्भय वर्द्धिनि
१६ प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता दक्षिणेऽवतु
वाराही नैर्ऋत्यां खड्गधारिणी १७ प्रतीच्यां वारुणी रक्षेद्वायव्याम्
गवाहिनी उदीच्यां पातु कौमारी ईशान्यां शूलधारिणी १८ ऊर्ध्वं
ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी नया एवं दश दिशो रक्षेच्चामुण्ड
शववाहना १९ जया मे चाग्रतः पातु विजया पातु पृष्ठतः अजि

दु॰ क॰ ५

तावामपार्श्वे तु दक्षिणे चापराजिता २० शिखामुद्योतिनी रक्षेदु
मामूर्ध्निव्यवस्थिता मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी
२१ त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके शङ्खिनी चक्षुषो
र्मध्ये श्रोत्रयो र्द्वारवासिनी २२ कपोलौ कालिका रक्षेत्कर्णमूले
तु शांकरी नासिकायां सुगंधा च उत्तरोष्ठे च चर्चिका २३ अधरे ४
चामृतकला जिह्वायां च सरस्वती दन्तान्रक्षतु कौमारी कण्ठदे
शे तु चण्डिका २४ घण्टिकां चित्रघण्टा च महामाया च तालुके

॥कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥२५॥ ग्रीवायां
भद्रकालीच पृष्ठदेशे धनुर्धरी ॥ नीलग्रीवा बहिःकण्ठे न-
लिकां नलकूवरी ॥२६॥ स्कन्धयोः खड्गिनी रक्षेद्बाहू मे वज्र
धारिणी ॥ हस्तयोर्दण्डिनी रक्षेदम्बिका चांगुलीषु च ॥ २७ ॥
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥ स्तनौ रक्षेन्महा
देवि मनः शोकविनाशिनी ॥२८॥ हृदये ललितादेवी उ
दरे शूलधारिणी ॥ नाभौ च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥

क पूतना कामिका मेढ्रं गुदे महिषवाहिनी॥ कट्यां भगवती र
५ क्षेज्जानुनी विन्ध्यवासिनी॥ ३०॥ जंघे महाबला रक्षेत्सर्व-
कामप्रदायिनी॥ गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी॥
॥३१॥ पादाङ्गुलीषु श्री रक्षेत्पादाधःस्थलवासिनी॥ नखा
न्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी॥३२॥ रोमकूपेषु- ५
कौमारी त्वचं वागीश्वरी तथा॥ रक्तमज्जावसामांसान्यस्थि
मेदांसि पार्वती॥३३॥ अन्त्राणि कालरात्री च पित्तं च मुकुटे-

श्वरी ॥ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ३४ ॥ ज्वा
लामुखी नखाजालमभेद्यासर्वसंधिषु ॥ शुक्रं ब्रह्माणिमेरक्षे
च्छायां छत्रेश्वरीतथा ॥ ३५ ॥ अहंकारम्मनोबुद्धिं रक्षेन्मे धर्म
धारिणी ॥ प्राणापानौ तथाव्यानमुदानञ्च समानकम् ॥ ३६ ॥
वज्रहस्ताचमेरक्षेत्प्राण कल्याणञ्च शोभना ॥ रसेरूपेचगन्धे
च शब्दस्पर्शे चयोगिनी ॥ ३७ ॥ सत्त्वंरजस्तमश्चैव रक्षेन्नारा
यणीसदा ॥ आयूरक्षतुवाराही धर्मरक्षतुवैष्णवी ॥ ३८ ॥

क०
६

यशः कीर्तिञ्च लक्ष्मीञ्च धनं विद्याञ्च चक्रिणी ॥ गोत्रमि
न्द्राणि मेरक्षेत्पशून्मेरक्ष चण्डिके ॥ ३९ ॥ पुत्रान्रक्षेन्महा
लक्ष्मी भार्यां रक्षतु भैरवी ॥ पन्थानं सुपथा रक्षेन्मार्गं क्षेमक
री तथा ॥ ४० ॥ राजद्वारे महालक्ष्मी विजया सर्वतः स्थिता ॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥ ४१ ॥ तत्सर्वं रक्ष मे ६
देवि जयन्ती पापनाशिनी ॥ पदमेकं न गच्छेत्तु यदीच्छे-
च्छुभमात्मनः ॥ ४२ ॥ कवचेनावृतो नित्यं यत्रयत्रैव गच्छति

तत्रतत्रार्थलाभश्चविजयस्सार्वकामिकः॥४३॥यंयञ्चिन्त
यतेकामन्तन्तम्प्राप्नोतिनिश्चितं॥परमैश्वर्यमतुलम्प्राप्स्य
तेभूतलेपुमान्॥४४॥निर्भयोजायतेमर्त्यस्सङ्ग्रामेष्वपरा-
जितः॥त्रैलोक्येतुभवेत्पूज्यः कवचेनावृतःपुमान्॥ ४५॥
इदंतुदेव्याः कवचंदेवानामपिदुर्लभम्॥यःपठेत्प्रयतो-
नित्यंत्रिसन्ध्यंश्रद्धयान्वितः॥४६॥दैवीकलाभवेत्तस्यत्रै
लोक्येष्वपराजितः॥जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः॥४७

क॰ ७

नश्यन्ति व्याधयस्सर्वे लूताविस्फोटकादयः॥स्थावरञ्ज
ङ्गमञ्चैव कृत्रिमञ्चापि यद्विषम्॥४८॥ अभिचाराणि स-
र्वाणि मन्त्रयन्त्राणि भूतले॥ भूचराः खेचराश्चैव कुलजाश्चो
पदेशिकाः॥ ४९॥ सहजा कुलजा माला डाकिनी शाकि
नी तथा॥ अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः॥
॥५०॥ ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः॥ब्रह्मरा ७
क्षसवैतालाः कूष्माण्डभैरवादयः॥ ५१॥ नश्यन्ति दर्शनात्त

स्य कवचे हृदि संस्थिते ॥ मानोन्नतिर्भवेद्राज्यं तेजो वृद्धि-
करं परम् ॥ ५२ ॥ यशसा वर्धते सो ऽपि कीर्त्तिमण्डितभूतले ॥
जपेत्सप्तशतीञ्चण्डीं कृत्वा तु कवचं पुरा ॥ ५३ ॥ यावद्भूमण्ड
लं धत्ते सशैलवनकाननम् ॥ तावत्तिष्ठति मेदिन्यां सन्ततिः पु
त्रपौत्रकी ॥ ५४ ॥ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ ५५ ॥ लभते परमं
रूपं शिवेन सह मोदते ॥ ५६ ॥ इति वाराहपुराणे हरिहरब्रह्मवि

अ० रचितं देव्याः कवचं समाप्तम्॥ ६ ॥ ॐ नमश्चण्डिका
८ यै॥ जयन्ती मङ्गला काली भद्रकाली कपालिनी॥ दुर्गा
क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते॥ १ ॥ जय त्वं देवि
चामुण्डे जय भूतार्तिहारिणी॥ जय सर्वगते देवि कालरात्रि
नमोऽस्तुते॥ २॥ मधुकैटभविद्राविविधातृवरदे नमः॥ रूपं
देहि जयं देहि यशो देहि द्विषो जहि॥ ३॥ महिषासुरनिर्णा- ८
सिभक्तानां सुखदे नमः॥ रूपं देहि जयं देहि यशो देहि द्विषो

जहि ॥४॥ रक्तबीजवधे देवि चण्डमुण्डविनाशिनी ॥ रूपं
देहि जयन्देहि यशोदेहि द्विषोजहि ॥५॥ शुंभस्यैव निशुंभ
स्यधूम्रराक्षसस्यचमर्दिनि ॥ रूपन्देहि जयन्देहि यशोदेहि
द्विषोजहि ॥६॥ वन्दितांघ्रियुगेदेवि सर्वसौभाग्यदायिनी
रूपंदेहि जयंदेहि यशोदेहि द्विषोजहि ॥७॥ अचिंत्यरूपचरि
तेसर्वशत्रुविनाशिनी ॥ रूपंदेहि जयंदेहि यशोदेहि द्विषो
जहि ॥८॥ नतेभ्यस्सर्वदाभक्त्या चण्डिके दुरितापहे ॥ रूप-

न्देहि जयन्देहि यशो देहि द्विषो जहि ॥ ९ ॥ स्तुवद्भ्यो भक्तिपू
र्वन्त्वाञ्चण्डिके व्याधिनाशिनी ॥ रूपं देहि जयन्देहि यशो दे
हि द्विषो जहि ॥ १० ॥ चण्डिके सततं ये त्वा मर्चयन्तीह भक्ति
तः ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ११ ॥ देहि सौ
भाग्यमारोग्यं देहि मे परमं सुखम् ॥ रूपं देहि जयन्देहि यशो
देहि द्विषो जहि ॥ १२ ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्च
कैः ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १३ ॥ विधेहि

देवि कल्याणं विधेहि परमां श्रियम् ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १४ ॥ सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १५ ॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तञ्च जनं कुरु ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १६ ॥ प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्वि

अ· षोजहि ॥१८॥ कृष्णेनसंस्तुतेदेवि शश्वद्भक्त्यासदाम्बिके
१० रूपंदेहि जयंदेहि यशोदेहि द्विषोजहि ॥१९॥ हिमाचलसुता
नाथसंस्तुतेपरमेश्वरी॥ रूपंदेहि यशोदेजयंदेहि द्विषोजहि
॥२०॥ इन्द्राणीपतिसद्भावपूजितेपरमेश्वरि ॥ रूपन्देहि
जयंदेहि यशोदेहि द्विषोजहि ॥२१॥ देविप्रचण्डदोर्दण्डदैत्य
दर्पविनाशिनी ॥ रूपंदेहि जयंदेहि यशोदेहि द्विषोजहि२२ १०
देविभक्तजनोद्दामदत्तानन्दोदयेम्बिके॥ रूपंदेहिजयंदेहि

यशोदेहिद्विषोजहि ॥२३॥ पत्नीमनोरमान्देहिमनोवृत्तानु
सारिणीम् ॥ तारिणीदुर्गसंसारसागरस्याकुलोद्भवम् ॥२४॥
इदंस्तोत्रंपठीत्वातुमहास्तोत्रंपठेन्नरः ॥ सप्तसप्तशतीसंख्या
वरमाप्नोतिसम्पदाम् ॥२५॥ इतिमार्कण्डेयपुराणेअर्गला
स्तोत्रंसमाप्तम् ॥ ॥ ॐ नमश्चण्डिकायै ॥ मार्कण्डेयउवा
च ॥ विशुद्धज्ञानदेहायत्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनि
मित्तायनमस्सोमार्द्धधारिणे ॥१॥ सर्वमेतद्विजानीयान्मन्त्रा

णामपिकीलकम्॥सोपिक्षेममवाप्नोतिसततञ्जाप्यतत्परः
॥२॥सिद्ध्यन्त्युच्चाटनादीनिवस्तूनिसकलान्यपि॥एतेन
स्तुवतान्देवीस्तोत्रमात्रेणसिद्ध्यति॥३॥नमन्त्रन्नौषधन्त
त्रनकिञ्चिदपिविद्यते॥विनाजाप्येनसिद्ध्येनसर्वमुच्चाटना
दिकम्॥४॥समग्राण्यपिसिद्ध्यन्तिलोकशङ्कामिमांहरः॥
कृत्वानिमन्त्रयामाससर्वमेवमिदंशुभम्॥५॥स्तोत्रंवैचण्डि
कायास्तुतच्चगुप्तञ्चकारसः॥समाप्नोतिसपुण्येनतांयथाव

न्नियन्त्रणा॥६॥सोपिक्षेममवाप्नोतिसर्वमेवनसंशयः॥ कृ
ष्णायांवाचतुर्दश्यामष्टम्यांवासमाहितः॥७॥ ददातिप्रतिगृ
ह्णातिनान्यथैषाप्रसीदति॥इत्थंरूपेणकीलेनमहादेवेन-
कीलितम्॥८॥योनिष्कीलांविधायैनांनित्यंजपतिसंस्फुटम्
॥ससिद्धःसगणस्सोपिगंधर्वोजायतेनरः॥९॥नचैवाप्यट
तस्तस्यभयंक्वापिहिजायते॥नापमृत्युवशंयातिमृतोमोक्ष
मवाप्नुयात्॥१०॥ज्ञात्वाप्रारभ्यकुर्वीतनकुर्वाणोविनश्यति